No. ४७६२

Title गुरुरहस्याद्गां पूजाविधानस्तोत्रम्

Author ×

Extent ६ पत्राणि Age ×

Subject तन्त्रम्

गुरुरुस्यांगपूजाविधानम् बिम्बसारोद्धारे

४७६१

4761

F. = 6

7-9

श्रीगणेशायनमः श्रीदेव्युवाच देवदेवजगन्नाथभक्तानुग्रहकार
क॥ गुरोस्तत्वप्रदीपिकांवदसोमकलाधर ॥१॥ गकारंचकथंदेवरेफं
तत्रचकीदृशं॥ उकारंचकथंदेववदमेकरुणानिधे ॥२॥ मंत्रंचकीदृ
शंदेवकिंध्यानंकस्यपूजनं॥ कथंमनोलयंयातिदेवताकिंप्रसीदति
॥३॥ ईश्वरउवाच॥ अतिगोप्यंत्वयापृष्टंलोकतत्वंवरानने॥ अवाच्यम
पिवक्ष्यामितवस्नेहात्सुरेश्वरि ॥४॥ वेदागमपुराणानितत्समानिव
दन्तिच॥ तद्रहस्यंप्रवक्ष्यामिशृणुत्वंवरवर्णिनि ॥५॥ मंत्राणांकोटि

कोटीनां तस्य पीठादि देवताः ॥ तस्य तत्त्वं प्रवक्ष्यामि सिध्यं तत्येव नसंशयः ॥ ६ ॥ मंत्रमूलं गुरो वाक्यं पूजामूलं गुरोः पदं ॥ ध्यानमूलं गुरोर्मूर्ति मोक्षमूलं गुरोः कृपा ॥ ७ ॥ गकारं गगनाकारं रेफं तारकमद्वयं ।
उकारं त्वतीयं प्रोक्तं मोमिति ज्योतिरूपकं ॥ ८ ॥ सर्वमंत्रस्वरूपस्य गवर्गबीजमुच्यते ॥ रेफः शक्तिर्भवेत्तद्वद् उकारः कीलकं स्मृतं ॥ ९ ॥ गकारं गगनाकारं रेफं तारकमद्वयं ॥ उकारं तुरीयं प्रोक्तं चिंतयेद्भवशांतये ॥ १० ॥ एवं वर्णा ध्वसंयुक्ता अनुलोमादिलोमतः ॥ प्रतिलोमा

स्ता
२

न्स्यानुच्चार्य सिध्यंत्येव न संशयः ॥११॥ यं यं काम मनुद्दिश्यत तद्भावोप
दिश्यते ॥ तत्तद्वर्णैश्च संयुज्य त्सर्वकार्यार्थ सिद्धये ॥१२॥ जपेन्मंत्रं महायो
ग्यंत वस्नेहात्प्रकीर्तितं ॥ रत्नानि यं प्रयत्नेन पिंडस्य जीवनं यथा ॥१३॥
सम्यग्लीनाय शांताय गुरुभक्तिरताय च ॥ दातव्याचत्वयाविद्या त्वन्यतरे
ण कदाचन ॥१४॥ श्रीदेव्युवाच ॥ देवानांदेव ईशान आदि मध्यांत वर्जि
तं ॥ तत्स्वतत्र परंब्रह्मसंचवरमेकरुणानिधे ॥१५॥ गुणागुणस्वरूपाय नि
र्गुणाय गुणात्मने ॥ सकलं निष्कलं चैव ब्रूमे नत वत्सल ॥१६॥ ईश्वर उवा
च ॥ शृणु देवि प्रवक्ष्यामि रहस्यानामनुत्तमं ॥ जरामृत्युजयं शोकं स्मर

२६
२

ण्यद्धिर्विनश्यति॥१७॥तारं पूर्वं समुद्धृत्य मन्त्रं दद्यादनंतरं॥मायानादं समु
द्धृत्य नयेद्दद्यादनंतरं॥१८॥अमृतं वीजसंयुक्तं अंते उकार एव च॥दद्यादिदं
ववाक्येन अमृतं स्रुतं कृतं॥१९॥वायुवीजेन संयुक्तं मन्त्रं दद्यादनंतरं॥
तद्बीजं पुनरुद्धृत्य एतन्मंत्रं प्रयोजयेत्॥२०॥तस्य रहस्यं पूजां च प्रवक्ष्यामि
विधानतः॥यस्य चार्चनमात्रेण तुष्टा भवंति देवताः॥२१॥अमूर्तिकं निराका
रं निर्विकल्पं निरामयं॥नित्यानंदं सदा पूर्णं सद्गुरुं तं नमाम्यहं॥२२॥एवं ध्या
त्वा गुरुं देवि ऊयीदावाहनादिकं॥आसनं पादुकां चैव अर्घ्यं पाद्योदकं तथा॥
२३॥स्नानालंकारणं चैव स्रग्वासादि विभूषणं॥अन्यानि राजचिह्नानि

ला द्यात्सर्वीशिरोदेशिकैः ॥२४॥ वासनात्सर्वगंधानां सर्वभूतेषु संस्थितं ॥ गंधाद्युर्धे
३ र्लविद्धं पंसुगंधाद्यं र्पयाम्यहं ॥२५॥ नित्यज्ञानप्रदीपाय निर्म्मेरसुखदायिने
॥ निर्विकल्पाय शांताय तस्मै श्रीगुरवे नमः ॥२६॥ ज्ञराज्ञेरस्वरूपाय शां
ताय गुरुमूर्त्तये ॥ अखंडमंडलं ध्यायेद्रज्ञतं तद्ददाम्यहं ॥२७॥ वनस्पत्युद्भ
वो धूपो गंधाद्यो गंधउत्तमः ॥ कर्पूरागरुसंयुक्तो धूपं प्रतिगृह्यतां ॥२८॥
नानारश्मिषु संभूतं सर्वलोकैकसाक्षिणं ॥ व्यापकं सर्वभूतानां स्वयंज्योति द
दाम्यहं ॥२९॥ नैवेद्यं षड्रसोपेतं नानान्नरूपसमन्वितं ॥ अमृतमयसंभूतं नैवेद्यं
प्रतिगृह्यतां ॥३०॥ आपो ब्रह्माणमित्याहुः सर्वबीजप्रकाशकः ॥ रसमत्योरसास्वा ३
दापोशानं प्रतिगृह्यतां ॥३१॥ हिरण्मयायं प्राणात्माजंगमे हृदि संस्थितं ॥

त्वत्तोसि सर्वभूतानां चिद्रूपाहि सदाशिवः ॥३२॥ अपवित्रोतिशुद्धात्मा आपोवा
रणसंस्थिताः ॥ आगतः शुचेति चित्तात्मा च मनीयं प्रतिगृह्यतां ॥३३॥ मनोज्या
तित्रयेब्रह्मनिर्विकल्पस्वतेजसि ॥ सर्वतिमिरहरणं नीराज्यं प्रतिगृह्यतां ॥
३४॥ चिंतामणिमनंतोयं सर्वलोकैकसाक्षिणं ॥ गुरुरूपधरं देवं प्रणम्य पुरु
षोत्तमे ॥३५॥ सर्वायसर्वरूपाय सर्वकर्मणिसाक्षिणे ॥ सर्वहृदिनिवासाय सर्व
सर्वजायनमोस्तुते ॥३६॥ त्रैलोक्यपूजितं पादं त्रिशक्तिगुणधारिणे ॥ त्रिमि
४९ र्तिरूपायत्रिनित्रस्तत्वात्मनेनमः ॥३७॥ उरसाशिरसाचैव हस्तपादसमन्वि
तं ॥ मनसाकर्मणावाचा श्रीगुरुं प्रणमाम्यहं ॥३८॥ एवं प्रणम्यदेवेशि यदीप्सा

प्राप्यकामया॥ तस्मिंस्तु दृष्टे जगतां दृष्टिर्भवत्येव न संशयः॥ ३९॥ श्रीदेव्युवाच
॥ आदिनाथाय देवाय देवाय सुरासुर नमस्कृत॥ रहस्यस्य स्थानपूजां च वद मे त्वं
कृपानिधे॥ ४०॥ यस्य स्थाने यद्वा च कं यत्पूजां विष्टदेवता॥ कृपया वद मे
देव चरणं चिंतयाम्यहं॥ ४१॥ ईश्वर उवाच॥ स्थलमानिमित्त त्वेन प्रवक्ष्या
मि यथाविधि॥ न्यासपूजानुसंधानं प्रकारं स्थलनायिके॥ ४२॥ सप्तद्वीपं
च नवनं सप्तब्रह्माण्डसागराः॥ इंद्रादिदेवताः सर्वे यच्छरीरे वसंति च॥ ४३॥
जन्माले पूजिते देवि पूजिताः सर्वदेवताः॥ उपेंद्रवरुणाग्निश्च नरवागेषु च
तिष्ठति॥ ४४॥ पादौ परिद्रुमाः सर्वे गुल्फयोर्नागदेवताः॥ जान्वोश्च क्षेत्र
पालश्च देव जंघयोर्भैरवादयः॥ ४५॥ आधारे पद्मशक्तिश्च पूजयेद्धुत्र ५

मास्थितिः॥स्त्राधिष्ठाने च देवेशि जगद्योनिः पितामहः॥४६॥ स्वं पूजयेत्
स्वशक्त्या च निर्गुणं सर्वभावनं॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुंधरा
॥४७॥ एकविंशच्च ब्रह्माण्डा नाभिमध्ये वसंति च॥ नाभौ पूज्यं च यत्नेन रुद्र
देवं चतुर्भुजं॥४८॥ इंद्रादिदेवताः सर्वा हृत्स्था भवंति योगिनः॥ हृदये प्रा
णमीशानं परमात्मा सदाशिवः॥४९॥ पंचवक्त्रं महादेवमुमया सहितं शि
वे॥ कंठे च मातरः सर्वा जीवविद्यासमन्विताः॥५०॥ त्रिलोकपावमास्थाय
योजयेत्तु रुषोत्तमं॥ सप्तकोटिमहामंत्रा दंतमूले च तालुके॥५१॥ जिह्वाग्रे
वैखरी प्रोक्ता चिबुके वरुणीमाश्रिताः॥ चंद्रसूर्यद्वयोर्नेत्रे करणी च अधिदेवता॥५२॥
कर्णौ भ्रूमध्ये महाप्राणैर्नरविंदुसमर्चयेत्॥ मेरुले न्यस्यते देवि वृत्तावि प्रसूर्वयेत् पुनः॥५३॥

श्री ५

पंक्तिभिर्वेष्टितेन त्रचत्वः षष्टिगृहेषु च ॥ चत्वः षष्टिस्थमध्ये च देवी चैकैकसंस्थिताः
॥५४॥ प्रकृतिस्थस्वशक्तिस्थ शिवशक्त्या समन्विताः ॥ नाहं च चार्चिता ब्रह्मा न दे
व चार्चितो हरिः ॥५५॥ मूलाधारत्रिपदद्वं द्वं मस्तके त्रविराजिता ॥ शांतवस्थानया
मध्ये तस्मै श्रीगुरुपादुका ॥५६॥ एवं प्रपूज्य देवेशि यदिच्छेदिष्टकाम्यया ॥
अन्यथा निष्फलं याति गुरुपादार्चनं विना ॥५७॥ धर्मार्थकाममोक्षाणामधि
पं च गुरुः स्मृतः ॥ तस्य संतुष्टिमात्रेण सर्वकार्यार्थसिद्धिदः ॥५८॥ गुरुमूलाः
श्रीके ३ क्रियाः सर्वा भुक्तिमुक्तिफलप्रदाः ॥ तस्मात्सेव्यो गुरुर्नित्यं भुक्तायेषु फलप्रदाः ॥५९॥
गुरुनिष्ठां च पूजां च कर्तव्या च दिने दिने ॥ परां गतिमवाप्नोति यत्सुरैरपि दुर्लभं ॥ ५
६० निमिषं निमिषार्धं वा न दुष्टमानं संस्मरेत्तरं ॥ स एव पतितो ज्ञेयः सत्यं सत्यं व
दाम्यहं ॥६१॥ नित्यज्ञानप्रदीपाय निर्वैरसुखराशये ॥ निर्विकल्पाय शांताय

तस्मै श्रीगुरवे नमः॥६२॥ अक्षराक्षरस्वरूपाय शांताय गुरुमूर्तये॥ आनंदैकरसानंदे
तस्मै श्रीगुरवे नमः॥६३॥ बोधाय बोधरूपाय शान्तिमायाधराय च॥ नादबिंदुस्वरू
पाय तस्मै श्रीगुरवे नमः॥६४॥ इच्छाज्ञानक्रियाशक्तिर्गुरुर्देहे वसंति वै॥ इति र
हस्यं महादेवि किमुक्तं ग्रंथकोटिभिः॥६५॥ अतिगोप्यं रहस्यं च न देयं यस्य कस्य
चित्॥ गुरुं न ज्ञायते ज्ञातव्यं अन्यथा न कदाचन॥६६॥ शठानां च न ज्ञातव्यं यद्यपि व
स्तु सहृशो॥ श्रीदेव्युवाच॥ अहो नाथ परंज्योतिरूपयानवतारक॥६७॥ यज्ञोप्य
मस्ति लोके च तत्सर्वं चैव वदस्व मे॥ ईश्वर उवाच॥ श्रृणु देवि प्रवक्ष्यामि तव स्नेहा
त्प्रकीर्तितं॥६८॥ गोपनीयं प्रयत्नेन पिंडस्य जीवनं यथा॥ गुरोर्नो मगृणातस्य सवै
देवाश्च वश्यनाः॥६९॥ मंत्रवीर्यं च विजेयं सत्यं सत्यं वरानने॥ इच्छाज्ञानक्रियाश
क्तिर्येस्य वाक्यात्समुद्भवः॥७०॥ स्वयमेव महादेवो गुरुरित्यक्षरद्वये॥ हितानंदस्य

पद्मपायद्वैतज्ञानस्वरूपिणे ॥७१॥ द्वैताद्वैतमहारूपशांतं गुरुमूर्तये ॥ अमूर्तिकं नि
राकारं निर्विकल्पं निरंजनं ॥७२॥ अतीव विनियोगेषु शांताय गुरवे नमः ॥ एक
पीठं जगत्सर्वं मे मे कमण्डल्वाद्यखेचरी ॥७३॥ मकारश्च महामंत्रो गुरुरित्यक्षरद्वये ॥
सर्वं मंत्रस्वरूपाय निर्गुणाय गुणात्मने ॥७४॥ स्वयं शाद्यमखिलं ध्यायेत्तस्मै श्री
गुरवे नमः ॥ शब्दब्रह्मस्वरूपाय निःसंगाय गुणात्मने ॥७५॥ आत्मानमखि
लं ध्यायेत्तस्मै श्रीगुरवे नमः ॥ सच्चिदानंदरूपाय हरये परमात्मने ॥७६॥ वारंवा
रं किमुक्तेन ग्रंथविस्तरपूर्वकं ॥ रहस्यं च माहात्म्यं गोप्यं जस्वाचास्य सुरवीन्नवेत्त
॥७७॥ इति श्रीविश्वसारोद्धारे उमामहेश्वरसंवादे गुरुरहस्ये गुरुपूजाविधानं
नाम स्तोत्रं समाप्तं ॥ शुभमस्तु ॥ १ ॥ ◎ ॥ ◎ ॥ ◎ ॥ ◎ ॥